पर्य्यङ्कूजि सरुजेव तरुण्यास्तारलोलवलयेन करेण" ।

**कुट्टाक** त्रि० कुट्ट—षाकन् । छेदके स्त्रियां ङीष् ।

**कुट्टापरान्त** पु० भूम्नि । जनपदभेदे "अत ऊर्द्धं जनपदान्निबोध गदतोमम" इत्युपक्रमे "कुट्टापरान्ता-माहेया कक्षाः सामुद्रनिष्कुटाः" भा०भी० ६अ० ।

**कुट्टार** पु० कुट्ट—कर्म्मभावादौ वा० आरन् । १पर्व्वते २केवले ३रमणे न० मेदि० ४कम्बले न० विश्वः ।

**कुट्टित** त्रि० कुट्ट—क्त । १छेदिते खण्डीकृते । तादृशे २पक्वमांसभेदे न० । "मांसमस्थ्यायु संगृह्य सूक्ष्मं कृत्वा सुकुट्टितम् । वेशवारगुणाढ्यम् स्वेदितं पाचितं भवेत् । कुट्टितं पाचितं मांसं सुस्वादु लघु दीपनम् । तत्रापि जाङ्गलं श्रेष्ठं जाङ्गलेष्वपि पक्षिणाम्" भावप्र० ।

**कुट्टिम** पुंन० अर्द्धर्चादि कुट्ट—भावे घञ् तेन निर्वृत्तः इमप् । १रत्नमयभूमौ भरतः २सुधालिप्तभूतले सुभूतिः ३कुटीरे स्वल्पगृहे मथुरानाथः । ४दाडिम्बवृक्षे राजनि० (क्षात) इति ख्याते बद्धभूमिभागे ५सौधप्रदेशभेदे हला० । "कान्तेन्दुकान्तोपलकुट्टिमेषु प्रतिक्षणं हर्म्यतलेषु यत्र" माघः "शाद्वलोपचितां भूमिं यथाकाञ्चनकुट्टिमाम्" भा०आनु०५४अ० । "प्रासादजातसम्बाधं मणिप्रवर-कुट्टिमम्" भा०आश्व० ८५अ० ।

**कुट्टिमित** न०कुट्ट—भावे घञ् तेन निर्वृत्तः इमप् ततः तार० इतच् । कुट्टमितशब्दार्थे शब्दचि० तन्मते सा०द० कुट्टिमितमिति पाठः "केशाधरादिग्रहणे मोदमानेऽपि मानसे । दुःखितेव बहिः कुर्य्याद्यत्र कुट्टिमितं मतम् । तत्र स्त्रीणामेष स्वभावः यदिष्टमप्यनिष्टतया निवारयन्त्य एव सुरतसुखमुपभुञ्जते इति तेन गाढपरिपीडने केशस्खलनादिग्रहणे च हर्षात् सुखेऽपि दुःखाविष्करणं दुःखेऽपि सुखाविष्ककरणम्" इति

**कुट्टिहारिका** स्त्री० कुट्ट—इन् कुट्टिं कुट्टितद्रव्यं मांसादि हरति हृ—ण्वुल् टाप् अतइत्त्वम् । दास्यां हलायुधः ।

**कुट्टीर** पु० कुट्ट—ईरन् । १क्षुद्रपर्व्वते हारा० २छेदके त्रि० ।

**कुट्टीरक** त्रि० कुट्टीरःक्षुद्रपर्व्वत इव कायति कै—क । क्षुद्रपर्व्वतवत्स्तूपीकृते "द्वितीयेन तस्यास्थीनि तद्भस्म च श्मशाने कुट्टीरकं कृत्वा रक्षितानि" वेतालः ।

**कुट्मल** पुंन० कुट—क्मलच् । १मुकुले विकाशोन्मुखपुष्पकलिकायाम् । "द्योतितान्तःसभैः कुन्द—कुड्मलाग्रदतः स्मितैः" माघः । अग्रान्तत्वात् दन्तस्य वा दन्तादेशः । २नरकभेदे न० यत्र रज्जुभिर्यन्त्रणा नारकिभ्यो दीयते तत्र । "तामिस्रमन्धतामिस्रमित्येकविंशतिनरकनकथने "संघातं सकाकोलं कुड्मलं पूतिमृत्तिकम्" मनुः "कुट्मलं यत्र बहुभिः पीडनम्" प्रा०वि० । मुद्रितपुस्तके कुड्मलमिति पाठः । कुड्मलमपि नरकभेदे । ३कुड्मलाकारे वाणाग्रभागे फलके च "विष्णुं सोमं हुताशं च तस्येषु समकल्पयन् । शृङ्गनग्निर्बभूवास्य भल्लः सोमोविशाम्पते ! । कुड्मलश्चाभवद्विष्णुस्तस्मिन्निषुवरे तदा" भा० क० ३६अ०,

**कुठ** छेदने सौत्रः पर० सक० सेट् । कोठति अकोटीत् । प्रनिकोठति ।

**कुठ** वैकल्ये (गतिप्रतिघाते) आलस्ये अक० मोचने सक० इदित् भ्वा० प० सेट् । कुण्ठति अकुण्ठीत् । प्रनिकुण्ठति कुण्ठनम् कुण्ठा ।

**कुठ** पु० कुठ—छेदने वज्रर्थे कर्म्मणि क । वृक्षे अमरः ।

**कुठर** पु० कुठ—वा० करन् । मन्थानदण्डाकर्षणरज्जुयुक्तस्तम्भे अमरः । [ उज्ज्वलदत्तः

**कुठाकु** पु० कुठ—आकुन् किच्च । (काठ ठोकरा) पक्षिभेदे

**कुठाटङ्क** पुंस्त्री कठारुरूपःटङ्कः पृषो० । कुठारे अस्त्रे जटा०

**कुठार** पुंस्त्री०कुठ—करणे आरन् । स्वनामख्याते काष्ठच्छेदनसाधने अस्त्रभेदे स्त्रीत्वे गौरा० ङीष् । "राजन्योच्चांसकूटक्रथनपटुरटद्घोरधारः कुठारः" प्रबोध० । "मातुः केवलमेव यौवनवनच्छेदे कुठारावयम्" भर्तृ० । "तं त्वा गताहं शरणं शरण्यं सम्भूत्यसंसारतरोः कुठारम्" भाग० ३,२५,१२, तल्लक्षणं हेमा० परि० ख० लक्षणसमुच्चये यथा—

"जमदग्निं प्रति शुक्रः प्रोवाच यथोपदेशं शुश्रूषो ! निबोध परशोरुत्पत्तिं द्रव्यक्रमयोगं प्रमाणं चोत्तममध्यमाधमानां नराणां सप्राणिः पाणिमुक्तइति द्विकर्म्मा परशुर्भवति । तत्र पञ्चाशत्पलिकः श्रेष्ठश्चत्वारिंशत्पलिकोमध्यमस्त्रिंशत्पलिकः कनिष्ठ इति । जातप्राणस्य पुरुषस्य सर्वायसमयस्त्रिविधः परशुर्भवति सार्द्धपञ्चाङ्गुलं श्रेष्ठस्य, सार्द्धचतुरङ्गुलं मध्यमस्य, सार्द्धत्र्यङ्गुलं निकृष्टस्य, मूलं विस्तृतम्भवति । तथा मध्ये सार्द्धपञ्चाङ्गुलं विस्तृतं चोत्तममध्यमकनिष्ठानां भवति । तथाङ्गमपि पञ्चदशाङ्गुलमुत्तमस्य, सार्द्धत्रयोदशाङ्गुलं मध्यमस्य, द्वादशाङ्गुलं निकृष्टस्येति परशोःफलम् । तयोत्तमं द्वादशाङ्गुलायामं, मध्यमं दशाङ्गुलायाममधमम ष्टाङ्गुलायाममित्येवमपि त्रिविधं भवति । कुणपेष्विव दण्डप्रमाणमुत्तममध्यमकनिष्ठभेदात्त्रिविधं शालकधवधन्वनशाका-